आभ्यां निषेव्यमाणां तां ध्यायेद्देवीं विचक्षणः ॥"
ध्यानस्यावश्यकत्वमाह । तन्त्रे ।
"प्रचण्डचण्डिकामेवमध्यात्वा यस्तु पूजयेत् ।
रुद्रस्तस्य शिरश्छित्वा देवी पिबति शोणितम् ॥"
पिबन्तीमिति तेन सुखेनेति शेषः ।
तथा च ।
"स्वमस्तकं सखर्परं रक्तधाराभिपूरितम् ।
ललज्जिह्वं महाभीमं धृतं वामभुजे तथा ॥"
इति भैरवतन्त्रे ।
तत्रैव ।
"सितं कुर्य्याद्दलं पूर्ब्बमाग्नेयं रक्तवर्णकम् ।
याम्यं कृष्णमतः पीतं शुक्लं रक्तं सितासितम् ॥
ततः पीतां प्रकुर्व्वीत कर्णिकां तस्य मध्यगाम् ।
तन्मध्ये तु प्रकुर्व्वीत मण्डलं चक्ररोचिषः ॥
रजःसत्त्वतमोरेखा रक्ता शुक्लासिता क्रमात् ।
मायायुग्मं ततो न्यस्य षड्दलसमन्वितम् ॥
बाह्यं तस्य च चक्रस्य कुर्य्यात् प्राकारवेष्टितम् ।
पूर्ब्बे रक्तं ततः कृष्णं सितं पीतं यथाक्रमम् ॥
चतुर्द्वारसमायुक्तं क्षेत्रपालैरधिष्ठितम् ॥"
इत्यस्याः पूजायन्त्रम् ॥ * ॥
यथा वा ।
"त्रिकोणं विन्यसेदादौ तन्मध्ये मण्डलत्रयम् ।
तन्मध्ये विन्यसेद्योनिं द्वारत्रयसमन्विताम् ॥
बहिरष्टदलं पद्मं भूबिम्बत्रितयं पुनः ।
कूर्च्चबीजं लिखेन्मध्ये त्रिकोणे फट् समन्वितम् ॥"
यद्वा एतद्ध्यानोक्तं यन्त्रम् ।
तथाच ।
"अपरञ्च प्रवक्ष्यामि शृणु देवि ! यथाक्रमम् ।
स्वनाभौ नीरजं ध्यायेद्भानुमण्डलसन्निभम् ॥
योनिचक्रसमायुक्तं गुणत्रितयसंज्ञितम् ।
तत्र मध्ये महादेवीं छिन्नमस्तां स्मरेद्यतिः ॥
प्रदीपकलिकाकारामद्वितीयव्यवस्थिताम् ।
योनिमुद्रासमायुक्तां हृदयस्थितलोचनाम् ॥
ध्येयमेतद्यतीनाञ्च गृहस्थानां निशामय ॥"
यथा,—
"अन्तरे स्वशरीरस्य नाभिनीरजपङ्कजाम् ।
निर्लेपां निर्गुणां शुद्धां बालचन्द्रसमप्रभाम् ॥
समाधिमात्रगम्याञ्च गुणत्रितयवेष्टिताम् ।
कलातीतां गुणातीतां मुक्तिमात्रप्रदायिनीम् ॥"
एवं ध्यात्वा मानसैः संपूज्य तारिणीवत्कलश-स्थापनं कुर्य्यात् । ततः पीठपूजा । आधारशक्तये । प्रकृतये । कूर्म्माय । अनन्ताय । पृथिव्यै । क्षीरसमुद्राय । रत्नद्वीपाय । कल्पवृक्षाय । तदधः स्वर्णसिंहासनाय । आनन्दकन्दाय । सम्विन्नालाय । सर्व्वतत्त्वात्मकपद्माय । सं सत्त्वाय । रं रजसे । तं तमसे । आं आत्मने । अं अन्तरात्मने । पं परमात्मने । ह्रीं ज्ञानात्मने नमः । पद्ममध्ये रतिकामाभ्याम् । भैरवमते तु ।
"आधारशक्तिं कूर्म्मञ्च नागराजमतःपरम् ।
पद्मनालञ्च पद्मञ्च पूजयेन्मन्त्रवित्तमः ॥
मण्डलं चतुरस्रञ्च रजः सत्त्वं तमस्तथा ।
रतिकामौ च संपूज्य शक्तिपूजां समाचरेदिति ॥

रतिकामोपरि वज्रवैरोचनीये देहि देहि एहि एहि एह्य एह्य मम सिद्धिं देहि देहि मम शत्रून् मारय मारय करालिके हूँ फट् स्वाहेति पीठमन्त्रः ॥ सर्व्वत्र प्रणवादिनमोऽन्तेन पूजयेत् । पुनर्ध्यात्वावाहयेत् । सर्व्वसिद्धिवर्णनीये सर्व्वसिद्धिडाकिनीये वज्रवैरोचनीये इहावह इहावह पुनस्तन्मन्त्रमुच्चार्य्य इह तिष्ठ इह तिष्ठ इह सन्निधेहि इह सन्निरुध्यस्व इत्यनेनावाह्य आं ह्रीं क्रौं हंसः इत्यनेन प्राणप्रतिष्ठां कृत्वा । ओम् आं खड्गाय हृदयाय स्वाहा इत्यादिना षड़ङ्गं विन्यस्य यथाशक्ति पूजां कृत्वा बलिं दद्यात् । यथा । वज्रवैरोचनीये देहि देहि एहि एहि गृह्ण गृह्ण इमं बलिं मम सिद्धिं देहि देहि मम शत्रून् मारय मारय करालिके हूँ फट् स्वाहा इति मन्त्रेण । ततो देव्या दक्षिणे ओँ वर्णिन्यै नमः । वामे ओँ डाकिन्यै नमः । ततो देव्यङ्गे षड़ङ्गं संपूज्य दक्षिणे ओँ शङ्खनिधये नमः । वामे ओँ पद्मनिधये नमः । पूर्व्वादिदिक्षु लक्ष्मीं लज्जां मायां वाणीञ्च पूजयेत् । विदिक्षु ब्रह्मविष्णुरुद्रेश्वरान् मध्ये सदाशिवं सर्व्वत्र प्रणवादि नमोऽन्तेन पूजयेत् । ततः पञ्च पुष्पाञ्जलिं दत्त्वा आवरणान् पूजयेत् । अग्नीशासुरवायुषु मध्ये दिक्षु च ओम् आं खड्गाय हृदयाय स्वाहा इत्यादिना षड़ङ्गानि संपूज्य अष्टपत्रेषु पूर्व्वादिक्रमेण ओम् ह्रीं काल्यै नमः एवं वर्णिन्यै डाकिन्यै भैरव्यै महाभैरव्यै इन्द्राक्ष्यै पिङ्गाक्ष्यै संहारिण्यै सर्व्वत्र प्रणवादिनमोऽन्तेन पूजयेत् । यथा,—
"एकां नामाभिधां कालीं वर्णिनीं डाकिनीं तथा ।
भैरवीञ्च महापूर्व्वां भैरवीं तदनन्तरम् ॥
इन्द्राक्षीञ्च सपिङ्गाक्षीं ततः संहारकारिणीम् ।
पूर्व्वादिके दले पूज्याः शक्तयश्च यथाक्रमम् ॥
प्रणवादिनमोऽन्तेन लज्जाबीजं समुच्चरन् ।"
पद्ममध्ये हूँ हूँ फट् नमः स्वाहा नमः । देव्या दक्षिणे सम्राट्छन्दसे नमः । देव्या उत्तरे सर्व्ववर्णेभ्यो नमः । पुनर्दक्षिणे आं बीजशक्तिभ्यां नमः । पत्राग्रेषु पूर्व्वादिक्रमेण ब्राह्म्यै माहेश्वर्य्यै कौमार्य्यै वैष्णव्यै वाराह्यै इन्द्राण्यै चामुण्डायै महालक्ष्म्यै सर्व्वत्र प्रणवादिनमोऽन्तेन पूजयेत् । ततश्चतुर्दिक्षु द्वारेषु ओम् करालाय नमः । विकरालाय नमः । एवं अतिकरालाय महाकरालाय । यथा, भैरवीये ।
"पूर्व्वद्वारे करालञ्च विकरालञ्च दक्षिणे ।
पश्चिमेऽतिकरालञ्च महाकरालमुत्तरे ॥"
ततो धूपादिविसर्ज्जनान्तं कर्म्म समापयेत् ।
विसर्ज्जने त्वयं विशेषः । संहारमुद्रां प्रदर्श्य अञ्जलावारोप्य वामनासापुटेन ।
योनिमुद्रासमारूढ़ां प्रदीपकलिकोज्ज्वलाम् ।
कृष्णपक्षे विधुमिव क्रमेण चोन्नतां गताम् ॥
इमं मन्त्रं समुच्चार्य्य चक्रमध्ये निवेशयेत् ।
उत्तरे शिखरे इत्यादि । अस्य पुरश्चरणं लक्ष-

जपः । सिद्धविद्यात्वात् ॥ * ॥ बलिदाने तु भैरवीये ।
"रात्रौ बलिः प्रदातव्यो मत्स्यमांससुरादिभिः ।
अथवा मधुपानाद्यैर्म्मधुरैर्व्विभवक्रमैः ॥
मन्त्रस्तु ।
उच्चरेत् प्रणवं पूर्व्वं सर्व्वसिद्धिप्रदेऽन्वितम् ।
वर्णिनीये ततो वाच्यं सर्व्वसिद्धिप्रदे ततः ॥
डाकिनीये ततो वाच्यं देवीनाम ततः परम् ।
एह्येहीति ततो वाच्यं इमं बलिमनन्तरम् ॥
गृह्ण गृह्ण ततः प्रोक्ता मम सिद्धिमनन्तरम् ।
देहि देहीति मायं च ततः फट्स्वाहया युतः ॥
बलिमन्त्रः समाख्यातः पूजितोऽयं सुरेश्वरीति ॥
मन्त्रान्तरम् ।
भुवनेशी कामबीजं कूर्च्चबीजञ्च वाग्भवम् ।
भुवनेशी कूर्च्चबीजं वाग्भवं तदनन्तरम् ॥
वज्रवैरोचनीये च हूँ फट् स्वाहा ततः परम् ॥
अस्य पूजाप्रयोगन्यासपूजादिकं षोड़शीवत् कार्य्यम् ॥ * ॥
हृल्लेखा मादनं लक्ष्मीर्व्वाग्भवं कूर्च्चमेव च ।
अस्त्रान्ता छिन्नमस्तायाः महाविद्या प्रकीर्त्तिता ॥
अस्यापि सदृशी विद्या जगत्स्वपि न विद्यते ।
षड्वर्णोऽयं मनुः साक्षान्मोक्षदो नात्र संशयः ॥
अस्या ध्यानमहं वक्ष्ये शृणुष्व कमलानने ! ।
प्रत्यालीढ़पदां सदैव दधतीं छिन्नं शिरः कर्त्तृकां
दिग्वस्त्रां स्वकबन्धशोणितसुधाधारां पिबन्तीं मुदा ।
नागाबद्धशिरोमणिं त्रिनयनां हृद्युत्पलालङ्कृतां
रत्यासक्तमनोभवोपरि दृढ़ां ध्यायेज्जवासन्निभाम् ॥
दक्षे चातिसिता विमुक्तचिकुरा कर्त्त्रीं तथा खर्परं
हस्ताभ्यां दधती रजोगुणभवा नाम्नापि सा वर्णिनी ।
देव्याश्छिन्नकबन्धतः पतदसृग्धारां पिबन्ती मुदा
नागाबद्धशिरोमणिर्म्मनुविदा ध्येया सदा सा सुरैः ॥
वामे कृष्णतनुस्तथैव दधती खड्गं तथा खर्परं
प्रत्यालीढ़पदा कबन्धविगलद्रक्तं पिबन्ती मुदा ।
सैषा या प्रलये समस्तभुवनं भोक्तुं क्षमा तामसी
शक्तिः सापि परात्परा भगवती नाम्ना परा डाकिनी ॥
इति ध्यानम् ।
अस्याः पूजादिकं सर्व्वं षोड़शीवत् कार्य्यम् ॥ * ॥
मन्त्रान्तरम् ।
तारं लज्जाद्वयं वज्रवैरोचनीये हूँ फट् स्वाहा ।
अस्यापि ध्यानपूजादिकं सर्व्वं षोड़शीवत् ॥ * ॥
वियत्स्वत्रयुतं बिन्दुनादयुक्तं ततः प्रिये ! ।
एकाक्षरी महाविद्या त्रैलोक्यवशकारिणी ॥
स्तनं दीर्घं ऊकारः ॥
ठठान्तेयं महाविद्या त्रैलोक्यमोहकारिणी ।
ताराद्यन्ता भवत्येषा चतुर्व्वर्गफलप्रदा ॥ * ॥